N.A.
Annapurna Slotram
अन्नपूर्णा स्तोत्रम्
Sanskrit
Paper – Handwritten
N.A. (Very old)
7 Folio
5.2"X3.8"
Complete

अथअन्नपूर्णास्तोत्रम्

चि

श्रीगणेशायनमः ॥ दधीचिरुवाच ॥ पुरा के
लाशशिखरे ॥ समासीनं महेश्वरं ॥ नत्वा
संपूज्य नंदीशः कृतांजलिरभाषत ॥ नं
दीरुवाच ॥ देवदेव महादेव सर्वदेवोत्त
म प्रभो ॥ आहारेण विनात्तृप्तिः कथं
भवति नहृदा ॥ १ ॥ इति तद्वचनं श्रुत्वा म
हादेवः कृपानिधिः ॥ नंदिकेशं विलो
क्याह सादरं भक्तवत्सलः ॥ २ ॥ श्रीशि
व उवाच ॥ अस्त्येकमन्नपूर्णायानाम्ना

स्म० ॥ मष्टोत्तरं शतम्॥ यदावृत्त्या निराहारस्त
॥१॥ स्मिर्भवति सर्वदा॥४॥ धनधान्यादिवृ
द्धिश्च तदावृत्त्या भविष्यति॥ आरोग्यं
चैश्वर्यं जायते नात्र संशयः॥ तन्नामा
नि प्रयत्नेन शुचिर्भूतेन सादरं॥ अन्न
पूर्णालये स्थित्वा जापनीयाः सुभक्तितः
॥६॥ प्रथमं भस्मना लिप्य ऊर्ध्वांगानि
विशेषतः॥ रुद्राक्षधारणं कृत्वा ध्यात
व्या परमेश्वरी॥ ध्यानं॥ ॐ दुकूलपरि ॥१
स्मेरमुखीं भजे॥ पाशांकुशाभयवरान्दधतीं जग
हृत्किनां॥१॥

बहुविचारपूर्वकं पठनीयं नामगोपनार्थं आछु
छधनत लिखितमस्ति

वीतांगीं विनाभरणशोभितां ॥ स्मितसं
पूर्णवदनां ध्यात्वा कार्योजपस्ततः॥२॥ ॐ
नमस्तेऽन्नपूर्णायै श्रीरूपिण्यै नमो
नमः॥ ॐ नमस्तेसिद्धि[redacted]यै नमो०॥
ॐ नमस्ते जगद्धात्र्यै नमो०॥ ॐ नमस्ते
ह्रींरूपिण्यै०॥ ॐ नमस्ते विद्याधात्र्यै०॥
॥ ॐ नमस्ते लक्ष्मीधात्र्यै०॥१॥ ॐ नम
स्ते विष्णुधात्र्यै०॥ ॐ नमस्ते ब्रह्मधात्र्यै०
ॐ नमस्ते देवधात्र्यै०॥ ॐ नमस्ते पृथ्वी

अ० धात्र्यै०॥ ॐ नमस्ते वेद धात्र्यै०॥ ॐ नमस्ते
॥२॥ नदी धात्र्यै०॥ ॐ नमस्ते अब्धि धात्र्यै०॥ ॐ
नमस्ते शैल धात्र्यै०॥ [illegible]
ॐ नमस्ते द्वीप धात्र्यै०॥ ॐ नमस्ते अन्नधा
त्र्यै नमो०॥ १६॥ एवं स्तुत्वा हृदि ध्यात्वा ब्रह्म
विष्ण्वादि सेविता॥ अन्नपूर्णा प्रयत्नेन ज
प[illegible]र्थे समाहितेः॥ १७॥ ॐ अन्नपूर्णा- जीया
देवी शं शंकरनाम मंत्रस्यानुष्टुप्छंदः॥ परमा
त्मा सदाशिवोऽहं ऋषिः॥ श्री अन्नपूर्णा एम॥
॥२॥

॥

गौरीभवानीदेवतास्वाहाशक्तिःस्वधाबी
जं॥ ह्रींकीलकंसर्वाभीष्टचतुर्विधपुरु
षार्थप्राप्तिपूर्वकअन्नपूर्णाप्रीत्यर्थंजपे
विनियोगः॥ अन्नपूर्णाशिवादेवीभीमा
पुष्टिसरस्वती॥ सर्वज्ञापार्वतीदुर्गाबाशि
नीशिवबल्लभा॥१८॥वेदविद्यामहाविद्या
देवीधात्रीविशारदा॥कुमारीयुवतीबाला
लक्ष्मीःश्रीःभयहारिणी॥१९॥भवानीवि
ष्णुजननीकृष्णादिजननीपरा॥गणेशज

॥ श्र· ॥
॥ ३ ॥

सिवा

ननीशक्तिः कुमारजननी सु[illegible] ॥२०॥ भा
ग्याश्रयाभगवतीभक्ताभीष्टप्रदायिनी
भवरोगहराभव्याशुभापरममंगला ॥२१
सर्वाणीचंचलापांगाचारुचंद्रकलाध
रा ॥ विशालाक्षीविश्वमाताविश्ववेद्या
विशालिनी ॥२२॥ आर्याकल्याणनि
लयारुद्राणीकमलासना ॥ शुभप्रदा
शुभावार्त्तावृत्तपीनपयोधरा ॥२३॥
अंबासंसारमथिनीमृडानीसर्वमंगला

॥ एम ॥
॥ ३ ॥

विष्णुसंसेविता[illegible]ल्मादिसुरसेविता ॥२४॥ परमानंददा[illegible] परानंदस्वरूपि ता
णी ॥ परमानंदजननी परमानंदप्रदायि
नी ॥२५॥ परोपकारनिरता परमा भक्तव
त्सला ॥ पूर्णचंद्राभवदना पूर्णचंद्रनिभांशु
का ॥२६॥ शुभलक्षणासंपन्ना शुभाननस
मन्विता ॥२६॥ शुभासौभाग्यनिलया शुभा
चाररतप्रिया ॥ चंडिका चंडमथिनी चंडद
र्पनिवारिणी ॥२७॥ चंडमार्तंडनयना चं

अ· ऽग्निनयनासती ॥ पुंडरीकपरीपुण्यापुण्य ल्पु
४ ॥ प्यस्वस्वरूपिणी ॥ २९ ॥ मायातीतस्सूक्ष्ममायाच
सृष्टधर्मात्मवंदिता ॥ अदृष्टासंगरहिता षृ
सृष्टिहेतुकपर्दिनी ॥ ३० ॥ वृषारूढाश्शूल
हस्तास्थितिसंहारकारिणी ॥ मंदस्मिताशु
द्धरूपाशुद्धचित्तमुनिस्तुता ॥ ३१ ॥ महा
भागवतीदक्षादक्षाध्वरनिवारिणी ॥ अ
पर्णानयनशरणाभक्ताभीष्टफलप्रदा ॥ रा
३२ ॥ नित्यासुंदरसर्वांगीसच्चिदानंदलक्ष राम
४

वाराही ललिता मातृ भैरवी श्रांत दर्शिनी ॥१०८॥

णा॥ सर्वसौभाग्यसिध्यर्थं जपनीयं प्रयत्न
तः॥३३॥ इयं नामावली जंभ्यं मयाद्य समुदी
रिता॥ गोपनीयं प्रयत्नेन नाख्येयं यस्य क
स्यचित॥३४॥ इदं स्वस्त्ययनं द्रव्यं महापात
कनाशनं सर्वाभीष्टप्रदं पुण्यं नित्यं मंगल
दायकं॥३५॥ भक्ताय स्वविनीताय शुभाचा
राय धीमते॥ आख्येयं न चान्यस्मै नंदिनस्त
वेपि सर्वथा॥३६॥ शुचिर्भूत्वा त्वियं जप्या
हि जैर्नामावली शुभा॥ अन्यथा वै परित्ये

श्र॰ नभविष्यतिफलंध्रुवं ॥ ॐलयाजप्यंमयाते
॥५॥ नकृत्वेवोह्यलनादिकं ॥ शिवे[illegible]तिकंठेनिरतं
ध्यू [illegible]जपनीयायथाक्रमं ॥ ३८ ॥ एतन्नामज
पंकृत्वास्तुत्वाचपुनरंबिकां ॥ शुचिर्भूत्वा
चसततंस्यातंप्रयत्नपूर्वकं ॥ ३९ ॥ एतन्ना
मजपेशक्तः सततंयः शुचिर्भवेत् ॥ सस
र्वांल्लभतेकामान्नात्रकार्याविचारणा ॥
॥ ४० ॥ इतीश्वरवचः श्रुत्वानंदिकेशः प्रय
त्नतः ॥ जपितान्येवनामानिसर्वकामार्थसि राम
॥ ५ ॥

हृये॥४१॥ स्कंदं एतानि नामानि जजा
पस्तेषु सिद्धये॥ शिवोदितानि नामानि
जजापस्तेषु सिद्धये॥४२॥ शिवोदिता
नि नामानि स्कंदः श्रुश्रावसादरम्॥
स्कंदादगस्त्यः श्रुश्राव नामान्येतानि सा
दरम्॥४३॥ श्रुत्वाजजापनामानि प्रिय
नामानि सादरं॥ जप्पते श्रुचिचित्तेन भ
वानीसन्निधौ सदा॥४४॥ श्राव हंतीति
मंत्रेणोत्थ तान्येतानि सादरं॥ जोजपेत्स

॥ श्र० ॥
॥ ६ ॥

न तं भक्त्यासर्वाण्येतानिनान्यतः ॥ शुचि
र्भूतेन मनसाजपनीयानि सर्वदा ॥ एत
ज्जपाधिकारस्तु ब्राम्हणास्य प्रकीर्तितः
न तो वेदरतैरेव जपनीयानि संततं ॥ ४७
कार्याण्यावाहनादीनी देव्याः शुचिर
तात्मभिः ॥ आवहंतीति मंत्रेण प्रत्येकं
च यथाक्रमं ॥ ४८ ॥ कर्त्तव्यं तर्पणं वा
पि तेन मंत्रेण मूलवत् ॥ तदान्विनैस्तु
होमोपि कर्त्तव्यस्तैश्च मूलवत् ॥ ४९

एम ॥
॥ ६ ॥

अ०॥ एतानि दिव्यनामानि श्रुत्वा ध्यात्वापि
८॥ संततं॥ स्मृत्वा देवीं च संततं सर्वान्
कामानवाप्नुयात्॥ ५०॥ इति श्रीशिव
रहस्ये अन्नपूर्णास्तोत्रं सम्पूर्णम्॥

राम॥
८॥

इतिश्रन्नपूर्णास्तोत्रसंपूर्णं